International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(5): 44-48
© 2024 IJMH
www.themultijournal.com
Received: 18-12-2024
Accepted: 26-12-2024
Publish : 28-12-2024

**डॉ. अञ्जली कबाटः**
अतिथि-अध्यापिका,
संस्कृतविभागः,
राजेन्द्रविश्वविद्यालयः,
बलाङ्गिरम्,ओडिशा

**Correspondence:**
**डॉ. अञ्जली कबाटः**
अतिथि-अध्यापिका,
संस्कृतविभागः,
राजेन्द्रविश्वविद्यालयः,
बलाङ्गिरम्,ओडिशा

# मेघदूते रामायणस्य प्रभावः

**डॉ. अञ्जली कबाटः**

**शोधालेखसारः –**

कालिदासस्य मेघदूते रामायणकाव्यस्य प्रभावः अत्यन्तं सूक्ष्मतया परन्तु निःसन्दिग्धरूपेण प्रतिवीक्षितुं शक्यते। बाल्मीकिरामायणे निरूपितः रामस्य जनकात्मजाविरहजन्यः विषादभावः यथा सर्वत्र प्रकट्यते, तथैव मेघदूतेऽपि यक्षस्य भार्यावियोगजनितम् अतिशयदुःखम् आधारभूतं भावतत्त्वं च दरीदृश्यते। “विरहिणो न विरहदुःखस्य सीमा विद्यते” इति तत्त्वमुभयकाव्ययोः मुख्यसमन्वयबिन्दुः विद्यते। विशेषतः, यथा यक्षेण मेघद्वारा यक्षिणीं प्रति सन्देशः सम्प्रेष्यते तदेव हनुमता आरब्धं दूतकार्यं स्मार्यते तेन हनुमतैव प्रथमं रामस्य अभिलषितसन्देशः सीतायै अदीयत इति दूतकाव्यपरम्परायाः आदिमूलं रामायणे एव स्थितम् इति दरीदृश्यते।

यक्षिण्याः स्वरूपेऽपि सीतायाः आदर्शस्त्रीस्वभावः, तस्याः पतिव्रतत्वञ्च अप्रत्यक्षमपि स्पष्टतया परिलक्ष्यते। एतादृशी चरित्रगतसमानता केवलमादर्शनारीस्वरूपे एव दृश्यते तथैव भूगोलवर्णने, मार्गचित्रणेषु, हृदयव्यथानिरूपणे च कालिदासः येन प्रकारेण बाल्मीकिकृतस्य रामायणस्य रसधारा अनुसृता, तेन मेघदूतम् केवलं दूतकाव्यस्य उत्कर्षस्थानं न प्राप्तम्, अपितु रामायणकाव्यपरम्परायाः काव्यमयीभावनायाः अपि वर्धनं कृतमिति।

**प्रमुखशब्दाः** - रामायणेन तुलना, रामसीताविरहस्तथा यक्षयक्षण्योः विरहः, सन्देशवाहकसादृश्यम्, यक्षरामयोर्मध्ये तुलना, स्त्रीचरित्रेषु आदर्शवादः।

**शोधालेखः –**

भारते प्राचीनकालादारभ्य अद्यावधिनिरन्तरवहमानायां काव्यपरम्परायाम् एकम् अद्वितीयं स्थानं बाल्मीकिकालिदासयोः कृतिषु द्रष्टुं शक्यते। भारतीयकाव्यधारायाः आद्ये महर्षीबाल्मीकिः आदिकविः, कालिदासः कविकुलगुरुः इत्यभिधानेन ख्यातौ, उभयोः काव्यकारयोः यद्यपि कालभेदः पूर्णरूपेण भिन्नः तथापि, तयोः कृतिषु प्रकट्यमानः भावसमन्वयः, रसैक्यं, चरित्रचित्रणशिल्पम्, तथा भारतीयसंस्कृतेः आदर्शमूल्येषु अभिन्नता चैतानि सर्वाण्यपि परस्परं सूक्ष्मैः सूत्रैः संयोजितानीव दृश्यन्ते।

अत्र कारणं हि यत् विद्वद्भिः अनेकैः मेघदूतम् इति कालिदासस्य लघुकाव्यत्वेऽपि रामायण-महाकाव्यस्य भावधारया सिक्तम् इति निर्णीतम्। यद्यपि मेघदूतं स्वातन्त्र्येण दूतकाव्य-रूपकौशलस्य उत्कर्षरूपेण स्थितम्, तथापि तस्य मूलभूतभाववृत्तौ रामायणप्रभावः अविच्छिन्नतया प्रकाशते।

रामायणं भारतीयसंस्कृतेः मानसभूमौ प्रतिष्ठितं महाकाव्यम्, यत्र सीतायाः विरहक्लेशः, रामस्य अनन्यधर्मनिष्ठा, हनुमतः अद्वितीयदूतकर्तव्यशक्तिः, तथा प्रियाप्राप्तेः उत्कण्ठा एते सर्वेऽपि विषयाः अत्यन्तं सूक्ष्मतया, करुणापूरितेन शैलीविन्यासेन विश्वमानवभावनया च दरीदृश्यन्ते। कालिदासेन वैदिकपुराणपरम्पराविपुलगाम्भीर्येण प्रशिक्षितहृदयेन, एतानि भावरूपाणि आत्मनः काव्यचेतसि सम्यगनुभूय, मेघदूते तेषां पुनराविष्करणम् एकेन नूतनकवित्वेन कृतम्।

विशेषतया यक्षस्य विरहव्यथा सीतायाः अनिर्वचनीयशोकस्यैव प्रतिसंस्मरणं जन्यते। यथा अयोध्या-काण्डे रामः सीतां विना आर्तस्वरेण विललाप – **“हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः।”**[1]

एवमेव यक्षेणापि भार्याविरहस्य तप्तहृदयेन, मेघं प्रति अनुनयीभूत्वा भावव्यञ्जनया स्वसन्देशं समर्प्यते। एवञ्च रामायणस्य अन्यत्र सीतया हनुमन्तं प्रति स्वदुःखातिरेकेण रामस्य मानसिकावस्था वर्णयन्त्या उच्यते –**“रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम्।”**[2] अस्याः वाक्यभङ्ग्याः उत्पद्यमानः करुणरसः, स्मृतिवेगः, पुनर्मिलनस्य आकाङ्क्षा चैते भावप्रवाहाः मेघदूतेऽपि समानप्रकारेण विकसिताः दरीदृश्यन्ते।

प्रेमप्रधानेन मेघदूतस्य यक्षेण, स्वपत्नीं प्रति अविचलानुरागयुक्तेन स्थितः, एतच्च न केवलं विरहदग्धनायकानां काव्यपरम्परा पूर्यते, अपि तु रामस्य सीतां प्रति अनन्यभक्तेः दार्ढ्यं प्रतिरूप्यते। यक्षण्या रूपवर्णने कालिदासेन यत् सौम्यता, लज्जा, पतिव्रतधर्मपालनम्, तथा मानसिकोदात्तता प्रदर्श्यते, तत् सर्वं सीतायाः आदर्श-गुणसमूहस्य पुनः आभासमिव प्रतिभाति।

दूतभावनायामपि रामायणमेव मुख्यप्रेरकत्वेन स्थितम्। रामस्य इच्छां पूरयितुं हनुमता यथा अनन्यया निष्ठया लङ्कां प्रति गन्तुं सज्जीभूतः, तथैव यक्षेण मेघाय दूतकर्त्तव्यस्य पावनत्वम् उपदिश्यते। हिमालयादारभ्य विन्ध्यपर्यन्तं नगरजनपदवर्णनं, पथवर्णनं च, मेघदूते यत् सौष्ठवं प्राप्तम्, तत् रामायणस्य उत्तरदक्षिणयात्रा-वर्णनस्यैव स्मरणं पौनःपुन्येन उत्पाद्यते।

अतः अन्ते इदं वक्तुं शक्यते यत् यथा मेघदूतं विना रामायण-ग्रन्थप्रभावः पूर्णतया न अवगन्तुं शक्यते, तथा मेघदूतस्य भाव-पाथेयम् अपि रामायणग्रन्थतुलनात्मकाध्ययनं विना आधुनिक-विद्वद्भिः सम्यगनुभवितुं न शक्यते। एतयोः उभयोः काव्ययोः परस्परान्वयः भारतीयसाहित्यं सहस्रप्रवाहमानस्य रसविलासस्य च स्थायिभावमिव निबध्यते।

**रामायणेन सह मेघदूतस्य तुलना –**

कविकुलगुरुकालिदासस्य काव्येषु रामायणस्य प्रभावः विस्तृत-रूपेण सम्प्राप्यते। किञ्च, एतैः विरचितकाव्येषु रामायणेन तुलनायां सत्यां तद्ग्रन्थप्रभावः स्पष्टरूपेण प्रमापयितुं शक्यते। यथा तत्र रघुवंशकाव्यस्य प्रथमस्वर्गे एव कुलगुरुणा अङ्गीक्रियते यत् आदिकविना बाल्मीकिना लिखितरामायणस्यैव तैः पुनस्मारणं क्रियमाणं विद्यते। तथैव मेघदूतेऽस्मिन् काव्येऽपि रामायणस्य प्रभावः प्रत्यक्षतया कुलगुरुणा अनुक्तेऽपि परिमिततया अनुमातुं शक्यते।

तत्र तावन्मेघदूते यथा नभसः पवित्रभूम्याः अतीव रम्यनिद-र्शनमीक्षते तथैव रामवधानन्तरं रामसीतयोः अयोध्यागमनसन्दर्भे-ऽपि उपरिष्टात् पावनमातृभूम्याः परिदर्शनम् आदिकाव्येऽपि परि-लक्षते। ऐदम्प्राथम्येन इदं वक्तुं शक्यते यत् मेघदूतेऽपि रामयणस्य प्रभावोऽस्तीति।

परन्तु नैकैः विद्वद्वरैरिदमङ्गीक्रियते यत् मेघदूतं तु कविकुलगुरूणां स्वकलया विरिचितमेकं रम्यं हृतचित्तखण्डकाव्यं विद्यते, परन्तु एतत् तु अनायासेन वक्तुं शक्यते यत् कविकुलगुरवः आदिकवि-बाल्मीकेः परमनुयायी बभूवुः स्वयमेव कालिदासेन स्वमहाकाव्ये रघुवंशे उच्यते-

**अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥** (१/४)

पुनश्च एतैः "Vaman krishna paranjpe" महाभागैः स्वस्य "**Fresh light of kalidas Meghadut**" इत्याख्यग्रन्थे उच्यते हि– "**The author of the Meghaduta certainly intended to present a picture universally true, at once realistic and idealized cleverly conceived and combined into one. of a lover-in-separation and his mental anguish, emotions and moods of during the helpless period of separation. He derived his inspiration from Valmiki's epic, for the central theme and it's development as also for many a detail In choosing the route of the cloudmessenger Kalidasa wanted to take and utilise the opportunity the describe the route and places particularly Ramgadh to Ujjayini, which he intimately knew and loved ao well for one reason or another.**"[3] इति। अनेन महाभागेन उच्चते यत्– यक्षेण यस्मिन् रामगिर्याश्रमे कुबेरस्य शापात् स्थितः आसीत् तदेव रामायणे चित्रकूटनाम्ना प्रसिद्धिः बभूव, अतः एतैः प्रमाणैरपि इदं तु स्पष्टं ज्ञायते यत् मेघदूतेऽपि रामयणप्रभावोऽस्तीति।

**रामसीताविरहस्तथा यक्षयक्षिण्योः विरहः –**

टीकाकारवचनानुसारेण स्पष्टमिदं यत् मेघदूतनाटके कुबेरेण यक्षः रामगिरिं प्रति निर्वासितो बभूव, एतच्च न केवलं कल्पितकल्पना अपितु तत्राप्यस्ति कश्चन विशेषः यथा रामसीतयोः वियोगः संस्कृतमहाकाव्येषु नाटकेषु च प्रसिद्धघटना विद्यते तच्च भवभूतेः ग्रन्थेभ्यः पुराणानां गहनाध्ययनेनैव अवगन्तुं शक्यते। तथैव यक्षण्याः वियोगात् दुःखितयक्षस्य वियोगोऽपि अस्मिन् काव्ये प्रदर्श्यते यच्च रामसीतयोर्वियोगस्यैव अनुस्मारणमिति वक्तुं शक्यते, किञ्च स्वप्रियायाः वियोगेन यक्षस्य मनोऽवस्थापि सीतया ऋते विरक्तस्य रामस्य स्मृत्या सह एव सम्बन्धः संस्थाप्यते।

एतेन च प्रापयितुं शक्यते यत् मेघदूते कविकुलगुरुभिः नैमि-त्तिकरूपेण रामसीतावियोगः एव उज्जीव्यते। तत्र च प्रमाणत्वेन पूर्वमेघस्य द्वादशतमश्लोके कविना यक्षविरहकालः उज्जीव्यमानः रामपदचिह्नस्य उल्लेखः क्रियते तद्यथा –

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्॥** (१२)

अत्र रामस्य वियोगः प्रत्यक्षतया अकथयतापि कविकुलगुरुणा यक्षविरहसमये रामपदचिह्नं स्मृतं, यच्च कुत्रचित् रामविरहवेलैव संसूच्यते। अतः एतेनापि प्रापयितुं शक्यते मेघदूते रामायणस्य प्रभावः अस्तीति।

**सन्देशवाहकसादृश्यम् –**

शापात् यक्षेण वर्षमेकं यावत् स्वप्रियतमायाः विरहे दहता स्वमनोगतभावनां मेघसमवाहकेन सम्प्रेष्यते, तत्र यथा रामायणे पुरुषोत्तमैः स्वार्धाङ्गिन्याः विरहात् हनुमन्तः वाहकत्वेन सम्प्रेष्यन्ते, प्रमाणं कुतः इति प्रश्ने सति तत् सत्यापयितुमुच्यते विद्वत्तल्ल-जमल्लीनाथसूरिभिः यत् – "**सीतां प्रति रामस्य हनुमत्स-न्देशं मनसि निधाय मेघसन्देशं कविना कृतमिति**"[4] । मेघदूतस्य अपरटीकाकारैः दक्षिणावर्तनाथवरैरपि इदमेव स्पष्टीक्रियते यत् – "**इह खलु कविः सीतां प्रति हनुमता हारितं सन्देशं हृदये समद्वहन् तत्स्थानीयनायकाद्युत्पादनेन सन्देशं करेतीति कश्चिदिति**"[5] इति।

पुनश्च तत्र मेघदूतस्य उत्तरमेघे सप्तत्रिंशत्तमपद्ये यथा –

**इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**
**त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम्।**
**श्रोष्यत्यस्मात्परमरविहिता सौम्य सीमन्तिनीमां**
**कान्तोदन्तः सुहृदुपनतः सङ्गमनात्किञ्चिदूनः॥** (३७)

अत्र यक्षेण स्ववाहकाय समुपदिश्यते यत् कथं यक्षण्या सः ज्ञास्यते तत्र प्रमाणत्वेन मेघेन यक्षण्यै उच्चते हि - **"भर्त्तुर्मित्रं प्रियमविधवे विद्धि"**[6] इति, पुनश्च कविकुलगुरुणा स्वयमेव उपमीयते तच्च रामायणेऽपि यथा रामैः स्ववार्तावाहकमित्राय हनुमते अङ्गुलीयकं प्रदत्तं स्वप्रमाणाय, येन सीतया यथा रामः परिचीयेत। एतेन कुलगुरूणां वाहकस्यापि कल्पनायां रामायणस्य प्रभावः मेघदूते स्पष्टरूपेण प्रत्यक्षतया च परिलक्ष्यते।

**यक्षरामयोर्मध्ये तुलना –**

मेघदूते कविकुलगुरुकालिदासेन विरहव्यथायाः अत्यन्तं मार्मिकं चित्रणं कृतं विद्यते। तत्र यथा यक्षः कश्चन अलकानिवासी, स्वकर्तव्यलोपेन कुबेरस्य शापेन विनष्टः, प्रियाभ्यः दूरं रम्येषु रमणीयदेशेषु प्रवृत्तः, ततश्च तस्य हृदयम् यक्षण्याः असह्येन विरहेण दग्धं जातम्।

तेन च, स्वदुर्मतेः कारणात् दण्डरूपेण यत् परावसनं प्राप्तम्, ततः प्रिया-संयोगलालसया पूरितहृदयेन तेन किञ्चिदपि स्थैर्यं न लेभे, तस्मात् तेन मेघं मित्रवत् अवलम्ब्य मेघमाध्यमेनैव स्वमनोगत-भावना सम्प्रेषिता तद्यथा - "त्वं गच्छ, स्वच्छं मार्गं विभज्य, मम प्रियाम् अलकानगरीस्थां यक्षिणीं वाक्यानि प्रेषय" इति यक्षेण मेघः सम्बोध्यते। अत्र विरहो त्यागश्च दरीदृश्यते, भक्तिः स्नेहश्च च बोध्यते। एतस्मिन्विषये यथा पूर्वमेघे प्रथमश्लोके एव कविगुरुणा उच्यते-

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥** (१)

एवं रामस्यापि कथा रामायणे द्रष्टुं शक्यते, सीताहरणानन्तरं रामस्य चित्तं विषण्णं जातम्। वनान्तरे सीतायाः अन्वेषणे रममाणेन तेन विरहदुःखस्य अतीव गम्भीरं रूपम् आस्वादयाञ्चक्रे। यत्र यत्र सीताया नाम श्रुतं तत्र तत्र तेन स्थगितम्, यत्र तदनुद्गमोऽनुभूतः तत्र दुःखभारात् निपतितम्।

पुरुषोत्तमस्तु अत्यन्तं धर्मिष्ठः न स्वकर्तव्यं विस्मरति, तथापि पत्न्याः वियोगेन तस्य हृदयम् उपर्युपरि व्यथितो बभूव। तेनापि हनुमान् स्वदूतरूपेण समुद्रं लङ्घयित्वा लङ्कायाः दिशि प्रेषितम्, यथा मेघदूते यक्षेण मेघः प्रेषितः तथा रामोऽपि स्वप्रियान्वेषणाय दूतः प्रेषितः, एतच्च आदिकविना बाल्मीकिनैव रामायणस्य अरण्य-काण्डे कथ्यते यथा –

**हा लक्ष्मण महाबाहो पश्यसे त्वं प्रियां क्वचित्।**
**हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः॥** (६०/३५)

यक्षरामयोः एतादृशसाम्यं द्रष्टुं रोचते यतो हि उभावपि विरहाग्निना दग्धहृदयौ, उभाभ्यामपि प्रियासम्प्राप्तये दूतः प्रेषितः। एतस्य प्रमाणाय मेघदूतकाव्यस्य टीकाकारैः पूर्णसरस्वतीवर्यैरपि **"कवेर्यक्षवृत्तान्ते सीतासमाधिरस्तीति केचित्। तन्न सहृदयहृदय-संवादाय प्रयोजनाभावात्"**[7] इति कथयतापि मेघस्य हनुमतः सादृश्यं विचिन्तितम् एतेन महानुभागोऽयं स्वलक्षणे अतिव्याप्तिदोषः समाचारितः, अर्थात् तेनापि रामायणस्य प्रभावः मेघदूते अङ्गीकृतः इति।

अथ यक्षस्य दुःखं स्वकर्तव्यलोपजन्यम्, तत्रापि अधर्मसङ्केतः सूचितः, तथैव रामस्य दुःखं तु अधर्मस्य अनपेक्षितं फलमेव। एवमेव यथा यक्षणीविरहदग्धयक्षः मेघस्य शीतलता मित्रभावेन अव-लम्ब्यते, तथा रामेण तु हनूमतः वीर्यं, भक्तिः, शीघ्रगमनशक्तिश्च अवलम्ब्यते। यत्र यक्षस्य वाणी काव्यरसपूरिता, तत्र रामस्य वाणी करुणया, आशया, तथा धर्मनिष्ठया पवित्रा दृश्यते। उभयोरपि हृदयेषु प्रेम्णः प्राधान्यम् अनायासेन प्रमापयितुं शक्यते , एतस्मिन् विषये सुरेशचन्द्रबनर्जी महभागैः स्वविरचित **"The cultural glory of ancient India"** इत्याख्यग्रन्थे लिख्यते यत् – **"The theme of the Meghaduta does not seem to be derived from any particular source. The idea of a man's sending, through a messenger, a message to his beloved may, however, have been suggested by Rama's sending, through Hanumat, a message to Sita in captivity in Lanka, as described in the Ramayana."**[8]

एवमेव एतैरपि महाभागैः अनुमीयते यत् मेघदूते यक्षस्य विरहावस्था, सन्देशवाहकत्वमित्यादि सर्वमपि कविकुलगुरुणा रामायणादेव स्वीकृतं विद्येत।

एतैः विविधैरपि प्रमाणैरयं स्पष्टो भवति यत् यक्षे रामत्वम्, मेघे हनुमत्त्वमित्यादि कविकुलगुरुणा प्रत्यक्षरूपेण अनुक्तेऽपि अपरोक्ष-रूपेण आदिकाव्यादेव अनुप्रेणितो भूत्वा खण्डकाव्यं विरचयामासे, तत्र तावत् आलङ्कारिकैरपि अङ्गीक्रियते यत् "नास्ति अचौरः कविजनः" इति किन्तु इदं येन गोप्यते तथा स्वस्यापि प्रतिभा रचना वा दर्श्यते, सः एव वास्तविककविरिति उच्यते, यच्च अस्माभिः कविकुलगुरुकालिदासेषु तदनायासेन लक्षयितुं शक्यते एव तैः मेघदूतकाव्येऽस्मिन् तथैव रामायणप्रभावं गोपयित्वैव ग्रन्थः विरच-याञ्चक्रे। इदमेव भवति श्रेष्ठकवेः कल्पनाशक्तिरिति।

**स्त्रीचरित्रेषु आदर्शवादः –**

मेघदूते वर्णिता यक्षणी तथा रामायणे प्रसिद्धा जानकी भारतीय-काव्यपरम्परायां द्वेऽपि स्त्रियौ मुख्यस्थानं विधत्तः, उभयोरपि नायिकयोः हृदये प्रेम, निष्ठा, धैर्यशक्तिः, करुणा च समानरूपेण दरीदृश्यते।

मेघदूतस्य कथायां यक्षण्या स्वभर्तुः अपराधतो यक्षतः पृथक् उष्यमाणं विरहेण जीवनं याप्यते स्म। तया सदैव "स्मारं स्मारं प्रियतमतनुं" इति भावेन पतिदर्शनाकाङ्क्षी भूत्वा अस्थीयत। न तया कोपः प्रदर्शितः, न वा दैवं निन्दितमपितु भर्तुः दोषं क्षमयित्वा

पुनर्मिलनस्य प्रभातं प्रतीक्ष्यते। एतेन च सुष्ठु ज्ञायते यत् यक्षयक्षण्योः अनुरागः पवित्रो विद्यते इति। अतः एव तत्र मेघदूतस्य उत्तरमेघे यक्षेण मेघः सम्बोध्यते यत्-

**जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-**
**दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।**
**वाचालं मां न खलु सुभगमन्यभावः करोति**
**प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत्॥** (३४)

एतेन सुस्पष्टरूपेण इदं ज्ञायते यत् अस्याः यक्षण्याः प्रेम, सौम्यं, शान्तं, कोमलं च विद्यते।

एवमेव रामायणे तु सीता अपि तथैव पतिव्रता आदर्शनारी बभूव। रावणेन हृता सा अशोकवाटिकायां वसन्ती रामस्य विरहव्यथां सोढवती, रावणेन भये प्रदर्शितेऽपि सीतया रामे दृढविश्वासः न परित्यक्तः। राक्षसपरिवेष्टितायामपि सा न कम्पिता तपसा, सत्येन, आत्मबलेन च तया स्त्रीशौर्यस्य मूर्तिरिव स्थिता बभूवे। एतस्मिन् विषये बाल्मीकिरामायणस्य सुन्दरकाण्डस्थद्वात्रिंशत्स्वर्गस्य चतुर्दशतमश्लोके सीतया हनुमान् सम्बोध्यते हि यत् –

**अहं हि तस्याद्य मनोभवेन, सम्पीडिता तद्गतसर्वभावा।**

**विचिन्तयन्ती सततं तमेव, तथैव पश्यामि तथा शृणोमि॥** (१२)

एतेन श्लोकेन इदं स्पष्टं प्रतीयते यत् सीता कीदृशी पतिव्रता तथा आदर्शनारी बभूव, एतादृशी समावस्था यक्षण्याः अपि समभूत्, अतः इदं तु ज्ञायते यत् कविकुलगुरुणा स्त्रीचरित्रेषु आदर्शत्वं रामायणादेव अभिप्रेरणां सम्प्राप्य स्वग्रन्थेषु प्रदर्शितः इति।

रावणेन सीतायाः कृते विवाहार्थं वर्षमेकं प्रदत्तम्। हनुमतः अशोकवाटिकायां सम्प्राप्त्यानन्तरं तस्याः रामविरहदग्धसीतायाः समीपे वर्षस्य एकः मासः अवशिष्टो बभूव। अतः सीतया हनुमान् संसूच्यते यत् रामस्य कृते एकमासस्यैव समयो विद्यते तदभ्यन्तरे एव तेन रावणः संहृयेत इति। तया सीतया रामाय तादृशसन्देशः सम्प्रेषितः। तच्च उक्तं हि बाल्मीकिरामायणस्य सुन्दरकाण्डे चत्वारिंशत्तमस्वर्गे–

**धारयिष्यामि मासं तु जीवितं शत्रुसूदन।**
**मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज॥** (१०)

सुन्दरकाण्डस्य एकोनत्रिंशत्तमे स्वर्गे हनुमता सीतायाः सः सन्देशः श्रुतः ततः हनुमता उक्तम् – "हे देवि ! भवत्याः घोरेऽस्मिन् राक्षसनिवासे बहुकालं न स्थातव्यम्" भवत्याः प्राणस्वरूपप्रभुरामागमने विलम्बः न भविता, अतः भवत्याः किञ्चिदेव प्रतीक्ष्येत। तदेव वाल्मीकिरामायणे सुन्दरकाण्डे चत्वारिंशत्तमस्वर्गे कथ्यते -

**तावुभौ पुरुषव्याघ्रौ राजपुत्रावनिन्दितौ।**
**त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः॥** (१५)

यक्षेणापि मेघदूतः संप्रार्थितः यत् शापनाशाय केवलं मासचतुष्टयमेव अवशिष्टं विद्यते। अतः शरदः परं पौर्णमास्यां रात्रौ पुनर्मिलनं कर्तेति। अतः कथञ्चित् नेत्रे निमील्य चतुर्मासाः व्यतीतव्याः तत्र हि उत्तरमेघे चतुर्विंशतितमश्लोके उच्यते –

**शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा**
**विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।**
**मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती**
**प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः॥** (२४)

इतःपरं मेघेन यक्षणी यक्षस्य समागमपर्यन्तं जीवितुं प्रार्थिता। यथा मेघदूतकथा पुनर्मिलनस्य प्रतिज्ञा आशीर्वादेन च समाप्तवती, तथैव हनुमतः यात्रापि शुभं भवेत् इति आशीर्वादेन रामायणकथा समाप्ता अभूत्।

यक्षण्याः विरहो मृदुलः, सौम्यः, भावुकश्च इति मन्यते, एवञ्च सीतायाः विरहो वीरधर्मसमन्वितः, दुष्करपरिस्थितिपरिपोषितश्च रूपेण स्वीक्रियते। यक्षण्याः दुःखं तु दैहिकवियोगमात्रं, किन्तु सीतायाः विरहो मानसिकम्, नैतिकम्, तपोमयम् च बभूव। 'रामदर्शनदुःखेन यदहं व्यथितामनेः।' इति प्रकारस्य भावः तस्याः चरित्रे स्फूर्यते। परन्तु उभयोर्मेलनन्तु दरीदृश्यते एव।

अतः इदं सुस्पष्टं यत् यक्षणी सौम्य-विरहस्य प्रतीका, सीता तु धर्मवीर्यस्य आदर्शप्रतिमा। उभाभ्यामपि स्त्रीभ्यामेकपतिव्रतस्यैव दिव्यतां वहतः—एकया सौम्यतया, अपरा तावत् धैर्येण। उभयोरपि प्रेम शुद्धं, निष्ठा दृढा, विरहः गाम्भीर्यपूर्णः, धर्मः अलङ्कारः च। समानता दृश्यते एतदर्थम् अनुमानेन इदं स्पष्टं यत् कविकुलगुरुणा सीताया त्यागात्, निष्ठायां, धैर्यात् अनुप्रेरणां सम्प्राप्यैव स्वमेघदूतः विरचितः इति।

**उपसंहारः –**

समग्रेऽस्मिन् अध्ययने प्रतिपन्नं यत् कालिदासकृतमेघदूतम् न केवलं दूतकाव्यपरम्परायाः शिरोमणिरूपेण प्रतिष्ठितम्, किन्तु भारतीयकाव्यपरम्परायाः मूलाधारभूते रामायणे निहितभावस्रोतसः अविच्छिन्नप्रवाहेणापि प्रपूरितं विद्यते इति। यद्यपि उभे काव्ये भिन्नकाले प्रादुर्भूते, तथापि भावसंरचना, करुणरसाभिव्यञ्जना, विरहनायकस्य मनोविश्लेषणम्, प्रियास्मृतिः, तथा दूतकर्त्तव्यस्य पावनता एते सर्वे तत्त्वतः एकस्मात् एव काव्यपरम्परास्रोतसः निःसृताः इति संद्रष्टुं शक्यते।

बाल्मीकिरचनायां सीताया विरहव्यथा, रामस्य अनुरक्तता, तथा हनुमतः दूतधर्मनिष्ठा एते मुख्यस्तम्भाः, कालिदासेनापि तदनुगुणमेव यक्षस्य विरहवेदना, यक्षण्या पतिव्रतप्रतीकम्, तथा मेघस्य दूतकर्त्तव्यं सव्यञ्जनतया नूतनरूपेण विकसितम्। विशेषतया रामस्य सीताविरहे करुणाभिव्यक्तिः,"हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः" इति वाक्येन प्रतिपादिता, एवमेव मेघदूतेऽपि यक्षस्य शोकावेशे स्पष्टप्रतिध्वनिः प्राप्यते।

एवं करुणविप्रलम्भश्रृङ्गारयोः मिश्रितभावप्रवाहः, यः रामायणे प्रौढतया प्रतिष्ठितः, स एव मेघदूते सौम्यलालित्येन पुनराविर्भूतः। यतो हि यक्षेण यथावत् रामस्य सदृशधैर्यं, अनुरागः, निष्ठा च उह्यते यक्षण्याः सौम्यता, लज्जा, पतिव्रतत्वम् एतान्यपि सीतायाः आदर्शात् प्रेरितानीव दृश्यन्ते। अतः स्पष्टं भवति यत् मेघदूतस्य नायकरूपकल्पना, नायिकाभावचित्रणम्, तथा दूतप्रणालिका एते सर्वे रामायणप्रभावेनैव विशिष्टता सम्प्राप्ता।

रामायणस्य करुणरसवर्णनम्, दूतप्रेषणपरम्परा, तथा प्रियाविरहस्य आनुपूर्व्यम् एतानि सर्वाण्यपि कालिदासेन न केवलं स्वीकृतानि, अपि तु सौम्यकान्त्या परिष्कृतं, नव्येन काव्यातिशयेन अलङ्कृतं विद्यते। अतः उपसंहाररूपेण इदं वक्तुं युज्यते यत् मेघदूते रामायणप्रभावः न केवलम् ऐतिहासिकसाहित्यसम्बन्धेन विद्यते, अपि तु भारतीयकाव्यचेतनायाः अखण्डधारायाः प्रत्यक्षप्रमाणं सम्भूयते।

**सन्दर्भग्रन्थाः –**

१. Paranjpe, Vaman Krishna. *Fresh Light On kalidasa's Meghaduta*, poona2: S. S. Oke, kalidasa sanshodhan Mandal, 1957

२. शर्मा,पं.श्रीकेदारनाथ,*मेघदूतम्,* वाराणसी, चौखम्भा संस्कृत संस्थान, 2016

३. रामायणम्

४. Banerjee, Suresh Chandra.*The Cultureal Glory of Ancient India,* New Delhi: D.k printworld(p)Ltd., 1917.

५. चतुर्धुरी, श्रीमान यतीन्द्रविमल,*वङ्गीयदूतकाव्यसाहित्यस्य इतिहास,* 1953

६. सूरिः, श्रीकृष्ण, *मेघसंदेशः,* श्रीरङ्गनगरम्, श्रीवाणीविलासमुद्रयन्त्रालयः, 1909

**सन्दर्भ**

1. बाल्मीकिरामायणम्, अरण्यकाण्डम्, ६०/३५

2. बाल्मीकिरामायणम्, सुन्दरकाण्डम्, २१/२४

3. Fresh light of kalidas meghadut, P - 10

4. मेघदूतम्, पं श्रीकेदारनाथ शर्मा, पृ-२

5. वङ्गीयदूतकाव्यसाहित्यस्य इतिहासः, श्रीमान् यतीन्द्रविमलचतुर्धुरी, पृ - ११

6. मेघदूतम्, उ.मे - ३६

7. मेघसंदेशः, श्रीकृष्णसूरिः, पृ - ७

8. The cultural glory of ancient India, Suresh Chandra Banerjee, P - 54